**दिनाङ्क :- 23.08.2025**

**प्रातः - 06:55**

## प्रधानमन्त्री/जापान-चीनयात्रा

प्रधानमन्त्री नरेन्द्र-मोदी अस्य मासस्य ऊनत्रिंशद्-दिनाङ्कात् जापान-चीन-देशयोः चतुर्दिवसीय-यात्रार्थं प्रस्थास्यते। श्री-मोदी पञ्चदशे भारत-जापान-वार्षिक-शिखर-सम्मेलने सहभागं कर्तुम् अगस्त-मासस्य ऊनत्रिंशद्-दिनाङ्कात् त्रिंशद्-दिनाङ्क-पर्यन्तं जापानदेशे भविष्यति। प्रधानमन्त्रिणः मोदिनः जापानदेशस्य एषा अष्टमी यात्रा भविष्यति। अपि च, जापानदेशस्य प्रधानमन्त्रिणा शिगेरु-इशिबा-इत्यनेन सह तस्य प्रथमं शिखरसम्मेलनं भविष्यति। सम्मेलनावधौ उभौ अपि प्रधानमन्त्रिणौ भारत-जापानयोः रक्षा-सुरक्षा-व्यापारार्थ-व्यवस्था-प्राविधिकी-नवाचारादीनां समीक्षां करिष्यतः। क्षेत्रीय-वैश्विक-महत्त्वपरक-विषयेषु अपि एतौ सविस्तरं चर्चां करिष्यतः।

स्वयात्रायाः द्वितीयचरणे प्रधानमन्त्री नरेन्द्र-मोदी तियानजिन-नगरे शङ्घाई-सहयोग-संधटनस्य शिखरसम्मेलने सहभागं कर्तुम् अगस्त-मासस्य एकत्रिंशद्-दिनाङ्कात् सेप्टेम्बर-मासस्य प्रथम-दिनाङ्क-पर्यन्तं चीनदेशे भविष्यति। शिखरसम्मेलनावधौ प्रधानमन्त्री अनेकैः वैश्विकनेतृभिः सह द्विपक्षीयविचारणां करिष्यति इति अनुमीयते।

## प्रधानमन्त्री/बिहारम्

प्रधानमन्त्री नरेन्द्रमोदी ह्यः अवदत् यत् आपरेशन्-सिन्दूर्-इत्यनेन भारतस्य रक्षा-कार्यनीतेः नूतनः मार्गः अङ्कितोऽस्ति। श्रीमोदी अवदत् यत् आतङ्कवादं भारते स्थापयित्वा आक्रमणस्य योजनां कृत्वा वा कोऽपि पलायितुं न शक्नोति। सः अवदत् यत् आतङ्कवादिनः भूमिस्थाः भूत्वा प्रच्छन्नाः स्युश्चेदपि भारतस्य क्षिपण्यस्त्राणि तान् अन्विष्यन्तीति।

गतवासरे बिहार-राज्यस्य गया-नगरे द्वादशसहस्रकोटि-रूप्यकाणां बहुविध-विकास-परियोजनानां शिलान्यासोद्घाटनानन्तरं प्रधानमन्त्रिणा एतदुक्तम्। एतासु विकास-परियोजनासु विद्युन्मार्ग-स्वास्थ्य-पौरविकास-जलापूर्तीत्यादयः अन्यतमाः सन्ति। श्रीमोदी गया-दिल्ल्योर्मध्ये अमृतभारत-एक्सप्रेस्-रेल्-यानस्य, वैशाली-कोडरमयोः मध्ये बौद्ध-सर्किट्-रेल्-यानस्य च ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्।

प्रधानमन्त्री कोलकातायामपि द्विशताधिक-पञ्चसहस्र-कोटिरूप्यकाणां विभिन्न-विकास-परियोजनानां शिलान्यासम् उद्घाटनञ्च अकरोत्। अत्रावधौ प्रधामन्त्री तिसृणां मेट्रोसेवानां शुभारम्भमपि कृतवान्।

## राष्ट्रपतिः/स्वीकृतिः

राष्ट्रपतिः द्रौपदी-मुर्मूः संसदा अभ्युपगतेभ्यः पञ्चभ्यः महत्त्वपूर्णेभ्यः विधेयकेभ्यः स्वकीयां स्वीकृतिं दत्तवती। एतेषु विधेयकेषु आन्तर्जालिक-क्रीडा-संवर्धन-नियमनम् अन्यतमम् अस्ति। एतदतिरिच्य राष्ट्रपतिना पञ्चविंशत्यधिक-द्विसहस्र-तमाब्दीयाय आयकराधिनियमाय, पञ्चविंशत्यधिक-द्विसहस्र-तमाब्दीयाय कराधानविधिसंशोधनाधिनियमाय, पञ्चविंशत्यधिक-द्विसहस्र-तमाब्दीय-प्रबन्धन-संस्थान-संशोधनाधिनियमाय च स्वीकृतिः दत्ता।

## राष्ट्रियान्तरिक्षदिवसः

अद्य द्वितीयः राष्ट्रियान्तरिक्षदिवसः अशेषदेशे आमान्यते। अत्रावसरे देशे अनेके कार्यक्रमाः आयोज्यन्ते।

## ऋतुः

भारतीयर्तु-विज्ञान-विभागेन अद्य राजस्थानस्य कतिपयेभ्यः भागेभ्यः अतिवृष्टेः रक्तवार्णिकी संचेतना प्रकाशितास्ति। आगामि-दिनद्वयं यावत् बिहार-छत्तीसगढ-गुजरात-हरियाणा-चण्डीगढ-दिल्ली-झारखण्ड-उत्तराखण्ड-पश्चिमीय-मध्यप्रदेशेष्वपि भीषण-वृष्टिः भविष्यतीति संभाव्यते।